यत्र संकीर्यमाणाः स्युर्व्यलीकस्मरणादिभिः ॥ उपचाराः स संकीर्णः किंचित्तप्तेक्षुपेशलः ॥ यथा ॥ १०

सासूयजल्पितसुधानि समत्सराणि मानोपरामणीयइंगिंगितानि ॥ कंसद्विषः स्फुरदमंदसुखा

यनं गाविक्रीडितानि सहराधिकया जयन्ति ॥ यथा वा ॥ ११ ॥

हस्तस्पर्शः ॥ अभितुलितत्व मूर्च्छापितत्वं ॥ श्रीकृष्ण

स्य साध्वसमत्र परकीयात्वप्रत्ययात् ॥ ९ ॥ नदेवं साध्वसमुदाहृत्य व्रीडामुदाहरति ॥ चुम्बइति ॥ अत्र च नदेतिय द्यपि स

वैव्रतात्वं वर्त्तत एव तथापि नवसंगमे चाधिक्यमिति ज्ञापनाय ॥ ९ ॥ व्यलीकमप्रियं ॥ १० ॥ कंसद्विषा समम् इति विवस्

कृष्णस्पर्शनस्तनयोर्मर्दनं ॥ ९ ॥ ऽ

वक्त्रं कर्त्तं ॥१२॥ अथ संपन्न इति संपन्नपदवत्त्वेनैव संक्षिप्तसंकीर्णावतिक्रम्येते ॥१३॥ अयं हंसदूतोक्तः प्रादुर्भावोऽलं

वक्त्रं किञ्चिद्दवांचितं विदधते नातिप्रसादोदयं दृष्टिर्भङ्गुरतायनं न किशनैकेरोषावशेषच्छटां ॥ राधायाः सखि सूचयत्सु विशदा वाग्यस्य या कल्तामानान्तं भुवनीतथापि मधुराकृष्णाधिनोत्याकृतिः ॥१२॥ अथ संपन्नः प्रवासात्संगते कान्ते भोगः संपन्न ईरितः ॥ द्विधा स्यादागतिः प्रादुर्भावश्चेति समागमः ॥ तत्रागतिः लौकिकव्यवहारेण स्यादागमनमागतिः ॥ यथोद्धवसंदेशे ॥ मा मंदाक्षं कुरु गुरुजनाद्देहली गेहमध्याद्देहि स्कान्ता दिवसमखिलं हन्त विश्लेषतोऽसि ॥ एष स्मेरो मिलति मदुते वल्लवीचित्तहारी गुंजावलिभिर्लीटंगघोमकुन्दः ॥ अथ प्रादुर्भावः ॥ प्रेष्ठानां प्रेमसंरम्भविक्लवानां पुरो हरेः ॥ आविर्भवकस्माद्यत्प्रादुर्भावः स उच्यते ॥ यथा श्रीदशमे ॥ तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ॥ पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ यथा वा हंसदूते ॥ अपि स्वप्नोद्दूरे विरमतु समक्षं शरणे हठाद्दविस्वद्ध्वामामभ्रीहसरिव मनो विभ्रमधिया ॥ वयस्यस्ते गोवर्द्धनविपिनमासाद्य कुतुकादकांडेयदूयः स्मरकल्लहफांड्डित्यमतनोत् ॥१३॥ रूढाख्यभावज्ञातो यः संभोगो वैप्रलम्भिकः ॥ निर्भरानंदशरावरमावधिरिष्यते ॥ द्विगुणा विरहार्त्तिः स्यात्तत्स्फुरणे त्वनुरागजे ॥ प्रादुर्भावे भवस्यत्र सर्वाभीष्टसुखोत्सवः ॥१४॥

ढाख्यभावाज्ञातः विप्रलंभेन चरदतीति वैप्रलंभिकः सचायं संभोगो निर्भरेत्यादि ॥१४॥ ऽऽऽऽ॥ ऽऽऽऽ॥ऽऽ॥

136

॥ उ०नी० ॥ अथ चतुर्णां विप्रलंभानां यथाक्रमं प्रागमकेषु च तुर्षु संभोगेषु व्रजप्रेयसीप्राधान्येनैवोदाह्रियमाणेषु पूर्वरागनीपमनिर्वा
॥ १३६ ॥ पकः संक्षिप्तः मानतापशमकः संकीर्णः स्वव्रजान्तर्गतप्रवासनिर्वासनः संपन्न इति क्रमेणोक्तः अथ समृद्धिर्वर्ण्यते तस्य
दुःसहचिरविप्रलंभस्य ध्वंसकः समृद्धिमान् वक्तुमपेक्ष्यते ॥ स च साध्वसव्रीडायुक्तात् संक्षिप्ताद्व्यलीकस्मरणयुक्तात्
संकीर्णात् तत्तदवधानहीनात् संपन्नादप्यधिकः ॥ तथा हि ॥ संक्षिप्तस्य प्रत्यासत्तेः अङ्कुरमात्रमयत्वाद्दृढप्रत्यासा
त्तिमयः संकीर्णस्तावद्धि शिष्यत एव ॥ संपन्नस्तु ततोऽपि विशिष्यते तत्रेक्षुदृष्टान्तगम्यात्तस्य स्वादविशेषा
दत्रास्वादाधिक्यं हि गम्यते ॥ आस्वाद्यगुणानामतिक्रमात्क्षुदतिशयस्थानीयो विप्रलंभः खल्वास्वादहेतुर्भ
वति ॥ क्षुदभावेनैव भक्ष्यादीनामरोचकत्वात् ॥ पूर्वरागमानावपि विप्रलंभरूपाविति क्षुत्स्थानीयत्वादेव

अथ समृद्धिमान् ॥ १५ ॥

न हेतुर्भवति चेत् किंमुत कमाद्रुहिं प्राप्तेन रागेण समवेतः प्रवासः ॥ यथा च वर्ण्यते गोपीनां परमानन्द आसी
द्गोविन्ददर्शने क्षणं युगशतमिव यासां येन विना भवेदिति ॥ तदेवं संपन्नस्य तद्वायाउत्तमत्वे सिद्धे ततोऽपि दूरग
चिरप्रवासरूपविप्रलंभस्य क्षुत्स्थानीयताधिक्यात्समृद्धिमतः स्वादविशेषः स्पष्ट एवेति पूर्वरागादितापोपश
मकसंक्षिप्तादिसदृशयातदधिकतया चावश्यवर्णनीय इति च समृद्धिमन्नामानं संभोगमाह ॥ अथ समृद्धि
मानिति ऋद्धिशब्दस्तावत्संपन्नतावाचकः ॥ तत्र समित्युपसर्गश्चाधिक्यं मतुप्प्रत्ययस्य प्रशंसातिशयनि
त्ययोगप्रत्यायनं तु ततोऽप्याधिक्यं दर्शयति ॥ १५ ॥ ॥ १३६ ॥

तदेवं योगक्षेमनिर्वर्त्तनेन तस्य सर्वाधिकोत्कर्षे लक्षणेन तदेवद्दर्शयति ॥ दुर्लभेति ॥ तदेतच्चक्रमवशाद्दर्शितयाश्री
मद्व्रजदेवीनां पूर्वरागादिरीत्या दर्शयितव्यया च तासां ललितमाधवरीत्या व्याख्यायते दुर्लभः कृच्छ्रसाध्यआ
लोकः परस्परं दर्शनमपि ययोर्दुर्लभालोकत्वस्य हेतुरूपान् पारतंत्र्यात्परस्परदर्शनादिविरोधिवशीभा।
वाद्दृपादानात् विप्रयुक्तयोः कुरुक्षेत्रयात्रामामिव तत्तद्भावनायात्रापि वियुक्तयोः सतोर्मे उपभोगातिरेकः परस्पर
दर्शनादिरूपः संक्षिप्तसंकीर्णसंपन्नानप्यतिक्रम्य संभोगातिशयः इष्टदृतिशमस्थानीय इष्टगतिमयचिरविप्र
लंभलभितास्वादविशेषतया सोऽयं समृद्धिमान् कीर्त्यते इत्यर्थः ॥ पारतंत्र्यादेतोः वियोगं प्राप्तयोरित्यर्थस्तत्र

दुर्लभालोकयोर्यूनोः पारतंत्र्याद्वियुक्तयोः ॥ उपभोगातिरेकोयः कीर्त्यते स समृद्धिमान् ॥ यथा
ललितमाधवे ॥ १६ ॥ इत्यंह तद्धानया वपुरिदं यस्यावलोकाशया सो दामभैवि पाटनेपटुरियं पी

घटते ॥ संक्षिप्तादिभ्योवैशिष्ट्यानुपपत्तेः ॥ दुर्लभालोकयोरित्यनेनैवतद्दर्शितं ॥ स्वयमेव च पारतंत्र्याद्वियुक्त
त्वामित्रिमपारतंत्र्यं दर्शयता दर्शयता दर्शितं ॥ गृहेयाः सेवंते प्रियमपरतंत्राः प्रतिनमित्यनेतस्त्रीयोदाहरणेन ॥
किंवाद्दीतएवापारतंत्र्याभ्यः पारतंत्र्याद्वियुक्तानां विशेषेण विना विप्रलंभेन संभोगः पुष्टिमश्नुत इति न्यायेन उ
दाहरिष्यते च तदिदं कुमेवेति ॥ १७ ॥ ननु सोऽयं समृद्धिमान् सर्वेषां विप्रलंभगतानां संभोगगतानां प्रभावानां फलरूपउ
उक्तः ॥ इतः समधिकं नास्ति सुखमिति स एव तु सर्वोत्तमत्वेन दर्शितानां व्रजदेवीनां न संभवति ॥ परकीयात्वेन
परतंत्राणां परित्यज्य परंगतेन कथंचिच्चिरात् कुरुक्षेत्रे प्राप्तेनापि कृरिति विप्रयुक्तेन पुनरप्राप्तेन श्रीकृष्णेन सद्दति

॥उ०नी०॥
॥१३७॥

रहितानां तत्रायोग्यत्वात् ॥ ततः कथं तासां सर्वासां मतं ॥ तदेतद्दर्शं कृत्वा तासां समृद्धिमत्त्वं गमयति ॥ यथा ललितमाधव
इति ॥ तत्र चेयं कथापरिपाटी ॥ श्रीमत्पद्मचन्द्रावलीराधादयस्तावद्भीष्मकादिपत्नीनां गर्भजाः ॥ माययैव चंद्रभान्वा
दिगोपपत्नीगर्भे संचारिताः ॥ अथैनास्तेनान्येन गोपेन विवाहश्चासां माययैव प्रत्यायितः ॥ तं च प्रत्याय्य तेन तासां रहःस
ङ्गः स्वकल्पितानां तादृशीनां नष्ट्यादिप्रापणेन विगमितः श्रीकृष्णेनैवामूः संगमिताश्च ॥ यदा च श्रीकृष्णः कंस
वधार्थं यदुपुरगतः तदा केन केन चित्प्रकारेणामूः भीष्मकादिगृहं नीताः ॥ भीष्मकादिकन्यास्तेनैव प्रत्याय्य
रुक्मिण्यादिनामभिः स्थापिताः कुमारीतयैव ज्ञापिताश्च ॥ तत्र रुक्मिण्यादीनां श्रीकृष्णेन विवाहश्च वर्णितः ॥ न
रकहृतानां षोडशसहस्रसंख्यकन्यानां च तथा रीतिः कृता ॥ तत्र सत्राजितापि सत्यभामाख्या श्रीकृष्णायो

ज्ञातिवृष्टिर्मया ॥ कालिंदीयत्तटीकुटीरकुहरक्रीडाभिसारव्रती सोऽयं जीवितबंधुरिंदुवदने भूयः समस्ता

पहारीकृतेन च्चेयं कथा कल्पनामय्येव किं तत्रास्ति चार्षं प्रमाणं ॥ यथा पाद्मद्वात्रिंशदध्यायाः प्रसिद्धे कार्तिकमाहात्म्ये
कैशोरे गोपकन्यास्ता यौवने राजकन्यका इति ॥ स्कांदप्रभासखण्डे च गोप्यादित्यमाहात्म्ये पट्टमहिषीरुद्दिश्य
षोडशैव सहस्राणि गोप्यस्तत्र समागता इति ॥ तस्मात् श्रीभागवते कुरुक्षेत्रयात्रायां श्रीव्रजदेव्यः पट्टमहिष्यश्च
परस्परं भेदेन वर्णितास्तत् खलु कल्पभेदादेवमत्र व्यंतदेवं स्थिते समृद्धिमत उदाहरणं श्रीराधामधिकृत्य
श्रीललितमाधवपद्येनाह ॥ दग्धं हन्तोत्पन्नेन तदिदं पद्यं सत्राजितार्पितायामपि श्रीराधायां द्वारकामध्यकल्पितवृं
दावने श्रीकृष्णेन दर्शनाभावाय चंद्रावल्या किंचित्कालं संगोप्य रक्षितायां द्वारकानाथो यमस्मा कं व्रजराजनंदन

॥१३८॥

अत्रेचापरितुष्यसाक्षाच्छ्रीव्रजे श्रीनंदनंदनत्वेनप्रसिद्धिंजातस्यश्रीद्वारकानाथस्यप्राप्तौश्रीद्वारकानाथस्यतत्स्वैवचनरूपं
पद्यमाह ॥ तवात्रेति ॥ नंदनंदनडुपलक्षणं श्रीमनोरथनामसर्वाहृणाद्भुमपिक्रोडीकरोति ॥ तथाहियदाश्रीगोष्ठेश्वर्याद्वार
कायांगमनंजातंचंद्रावल्याश्चगोकुलसिद्धनिजभगिनीत्वंश्रीराधयाप्रतीतंतदाश्रीकृष्णेनसाधयोर्विवाहःसंवृत्त
स्तदाचश्रीकृष्णराधयोरुक्तिप्रत्युक्ती ॥ तत्रश्रीकृष्णस्योक्तिः ॥ प्राणेश्वरीप्रार्थ्ययस्वकिंमतःपरंतेप्रियंकुरवाणीति ॥
अथश्रीराधिकायाःप्रत्युक्तिः ॥ सख्यस्तामिलितानिसर्गमधुरप्रेमाभिरामीकृतायामीयंसमगंस्तवतीश्चश्वश्रूगोष्ठेश्वरी ॥
वृन्दारण्यनिकुंजधाम्निभवतासंगोप्यपारडूवानसंवृत्तःकिमतःपरंप्रियतरंकर्तव्यमित्रास्तिमेइति ॥ तदेतदुक्तापि

नतवत्रपरिमर्गपताकिमपिलक्ष्मसाक्षादियं ॥ मयात्वमुपसादितानिखिललोकलक्ष्मीरसि ॥ यथाज
गतिचंचलताचनाकमुष्टिंसेपक्षघजनेनपतिताडरः कनकवृष्टिरासाद्यते ॥ इतिमधुररसपरिपाकविवेकः ॥

तत्रतस्यवृंदावनस्यकल्पितत्वंवितर्क्यपुनराह ॥ यातेलीलापदपरिमलोद्गारिवन्यापरीताधन्याक्षोणीविलसतिवृ
तामाधुरीमाधुरीभिः ॥ तत्रास्माभिश्चटुलपशुपीभावमुग्धान्तराभिःसंवीतस्त्वंकलयवदनोल्लासिवेणुर्विहारमिति ॥
अत्रमाधुरीतिमधुरायुर्म्याअदूरभवेत्यर्थः ॥ अदूरभवश्चेतिचातुरर्थिकस्तद्धितः ॥ साक्षोणीवृंदावनभूरितिव्याख्ये
यं ॥ अत्रपूर्वपद्येसख्यस्ताइतिसंगान्तरापगमात्यामीमितिभगिनीत्वेनप्रसिद्धेनचंद्रावल्याःसपत्नीयोगेर्ष्याप्रमिता
गात्श्वश्रूश्चेतिप्राचीनश्वश्रूर्मन्याजटिलाचश्रीकृष्णानुगतिविरोधित्वाभावात्प्रत्युततदीपानुकूल्यात्वृंदारण्यपति
तादृशेप्यस्मिन्किंमनसाज्ञान्तस्मिन्नितिस्थानसंकोचापगमान्निर्विलम्बार्थंत्वन्मुकुंदत्वंदर्शनंभवतासहसंगोप्यपं

138

उ०नी०॥ रङ्गवान्नानाकौतुकवान् संहृत्तदुपभोगानिरेकस्य परार्धादर्शिता ॥ ननु भ्रस्तु दुर्लभालोकयोर्ण्णोरितिसमृद्धि
॥१३८॥ मदाख्यसंभोगस्य लक्षणमत्र पर्यवसितं ॥ तदेवं सत्युत्तरपक्षे तत्केमुत्यमेवलब्धमिति ॥ अत्र श्रीकृष्णस्याभ्यु
पगमः ॥ प्रियेतयास्त्विति ॥ सोयमभ्युपगमश्च कायव्यूहेन द्वारकायां श्रीवृन्दावने चाविर्भावात्संगमनीयः
तत्तल्लीलोचितरूपस्वप्रियतमसहितेन पट्टमहिषीरूपेण पूर्ववत्त्र श्रीव्रजदेवीरूपेण तु परत्रेति ॥ किंतु व्र
जदेवीनां श्रीकृष्णेन विवहनं श्रीगोवर्द्धनयोः साक्षादितितासामन्येन विवहनं च मायिकमात्रतया ज्ञातमिति
च तयास्वयुक्तेण श्रीकृष्णेन स्वनुबाभिरम्यं द्रावत्यादिभिश्च गतमायायोगमायादिद्वाराप्रमापय्य व्रजे प्रकाशित
मितिज्ञेयं ॥ अन एव श्रीवृन्दावनगतदृशार्णसुपासनावरणपर्तसुभयाभेदमानिभिर्मुनिभिरमरुक्मिण्यादि
नामतत्तोपास्यमानास्तत्रादिषुश्च यंते द्वारकादिषु च स्वतंत्रतत्तद्रूपतयेति ॥ तदेवमभेदेन ग्रंथकृद्भिरेव
कृतं तस्य त्वत्तिनमाधवस्य सिद्धान्तः कादाचित्कत्वगतो ज्ञेयः ॥ अथ भेदेन प्रापितकल्पगतसिद्धान्तश्चैतैरे
व श्रीभागवतानुसारेणात्राप्यङ्गीकृतोस्ति ॥ यथा कुरुक्षेत्रे त्रयात्रायां मोदनाख्यभावप्रसङ्गे ॥ हन्त संभक्त
दि रम्यैनामवविकुरोर्भद्रासरस्वत्सम्भ्रंत्पादिना ॥ यथा च श्रीमदुद्धवसंदेशाख्ये काव्ये ॥ विंदून् वंशी स्फुरितवदने
नेत्रवीथीमकस्मादनर्वोधाकवत्तिनधियो घातुभिर्धूमलाङ्कः ॥ क्रीडाकुंजे लुठितवपुषः स्वागमानन्दधाराक
ल्लोले स्तेरहसि सहसोरुत्तुङ्गमुल्लासपिष्यत्यनेन ॥ अत्र च पक्षे पूर्ववन्महाविप्रलंभसमापनायदन्तवक्रवधा
नन्तरं श्रीकृष्णसंगो कुत्रागमनं पाद्मोत्तरखण्डवचनादिसंगृह्य संक्षेपभागवतामृतेत्वयमेव ग्रन्थकृद्भिर्दर्शि
तं ॥ वेन्नवतोषण्यां तदयजचरणैश्च ॥ यथा प्रव्यमंतावत्पाद्मोत्तरखंडगद्यं ॥ कृष्णोपितं हत्वा यमुनामुत्तीर्य्य नन्द ॥१३८॥

व्रजं गत्वा सोत्कंठौ पितरावभिवाद्याश्वास्य ताभ्यां साश्रुकंठमालिंगितः ॥ सकलगोपवृद्धान् प्रणम्याश्वास्य बहुवस्त्राभ
रणादिभिस्तत्रस्थान् सर्वान् संतर्पयामासेति ॥ श्रीमद्भागवतसम्मतं चेदं ॥ तत्र सत्यसंकल्पतयावेदादिभिर्गीतस्यास्य संक न
ल्पः स्पष्टः ॥ नास्तत्यानप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ॥ सांत्वयामास सप्रेमैरायास्य इति दौत्यकैरित्यत्र ॥ यानस्यं व्रजंता
न वपुंच स्वे हृद्गुःखितान् ॥ ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमित्यत्र च ॥ द्रष्टुमिति दर्शनविषयीभवितुमित्य
र्थः ॥ अथापि भूमन् महिमा गुणस्य ते विबोद्धुमर्हतीत्यत्र बोधविषयीभवितुमर्हतीतिवत् ॥ किं तु ज्ञेनसार्द्धं यद्व्रजायग
मनं न कृतं तत्र खलु भाविजरासंधादिकृतोपद्रवाणां व्याप्तिमेत्तस्य न्येन व्रजेपि स्यादित्याशंकयेति ज्ञेयं ॥ तदेतद
भिप्रेत्याह विधाय सुहृदां सुखमिति ॥ सुखमत्र जरासंधादिविपक्षनिर्हरणमेव ज्ञेयं ॥ एवं च तत्संकल्पः स्पष्टः श्रीमदु
द्धवेनापि निश्चितः ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान् सात्वतांपतिरित्यनेन ॥ त
योः पित्रोः प्रियं हि सदा तल्लालनरूपमेव ॥ द्वारकावासिप्रजावचने तु तस्यागमनं स्पष्टमेव ॥ यर्ह्यम्बुजाक्षापससार
भो भवान् कुरून् मधून्वाथ सुहृद्दिदृक्षयेत्यत्र मथुरामिति स्वामिटीका च ॥ सुहृद्दिदृक्षया तदा तत्र श्रीव्रजस्थाप
व तत्र योगप्रभावेन नीत्वा सर्वजनं हरिरिति माथुराणां द्वारकाप्रवेशे सर्वशब्दप्रयोगात् ॥ बलभद्रः कुरुश्रेष्ठ भगा
वान् रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नन्दगोकुलमिति तत्रैव सुहृच्छब्दप्रयोगात् ॥ दन्तवक्रवधानन्तरमेव
चात्रागमनमर्यादा ॥ यथाह कुरुक्षेत्रयात्रायां श्रीव्रजदेवीः प्रति श्रीकृष्णः स्वयमेव ॥ अपि स्मरथ नः सख्यः स्वाना
मर्थचिकीर्षया गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतस इति ॥ अत्र हि दन्तवक्रवधानन्तरं शत्रुपक्षक्षपणमात्रं निजेत्र
जागमने मर्यादा कृता ॥ कुरुक्षेत्रयात्रा चेयं दन्तवक्रवधात्पूर्वमेव ॥ साल्ववधसहितस्यास्य दन्तवक्रवधस्य समका

लमेव हि पाण्डवानां वनगमनं प्रसिद्धं॥ तेषामागमनानन्तरमेव च भीष्मादिवधमयं भारतयुद्धं॥ सा यात्रा च भीष्मा
द्यागमनमयीति॥ तथा च श्रीवल्लदेवतीर्थयात्रा कुरुक्षेत्रयात्रातः पूर्वं पठिता॥ तद्यात्रा दुर्योधनवधदिने पूर्णेति
सा च कंसवधान्नातिदूरा॥ यत एव तस्यामेव यात्रायां श्रीमद्दानकदुंदुभिना कुंतीदेव्या मुक्तं॥ कंसप्रतापितास्स
र्वे वयं याता दिशं दिशं दिष्ट्याद्य पुनः स्थानं दैवेनासादिताः स्वसरिति॥ किन्तु दन्तवक्रवधस्थानं कल्पभेदरीत्यावा
वैष्णवतोषण्यां व्याख्यातं त्या वा श्रीभागवतपाद्मयोर्विवादमिव परिहृत्य संगमनीयं दन्तवक्रवधानन्तरं श्रीकृष्णस्य
व्रजागमनं तु श्रीभागवतस्यापि संमतं॥ यत्तु पूर्वं गद्यानन्तरं पाद्मोत्तरखंड एव पद्यमस्ति कालिंद्याः पुलिने रम्ये
पुण्यवृक्षसमाचिते गोपनारीभिरनिशं क्रीडयामास केशवः॥ रम्यकेलिसुखेनैव गोपवेशधरः प्रभुः बद्धप्रेमरसेनात्र मा
सद्वयमुवास हेति॥ अत्र गोपनारीभिरित्यत्र गोपजातिभिर्नारीभिरिति गम्यं॥ तृतीयस्कंधे श्रीशुकदेववचने देवहूतिं
प्रति नृपवधूरिति न तत्॥ अनिशमित्यनेनोपपत्त्यभ्रमानन्तरं दाम्पत्यमेव प्रकटं वभूवेत्यागतं॥ वनितानां शतयूथपत्त्व
नेन तावतीभिः सह निरन्तरक्रीडापांसवैर्ज्ञातायामपि संकोचराहित्यव्यंजनात्॥ तथैवाह रम्येति॥ रम्यत्वमत्र सर्वे
षां मनोरमत्वं॥ अन्यथा हि तस्मिन्केलिप्रवेशे विरूपे सर्वस्यापि तद्दृशस्य विगानविषयत्वं स्यादिति॥ अत एवात्र व्रजे सर्वेषामे
व प्रेमपोषणमभूदित्याह बद्धप्रेमेति॥ अथ तदनंतरं गद्यानन्तरं॥ अथ तत्र स्थाने नंदादयः पुत्रदारसहिताः पशुपक्षिमृगाद
यश्च वासुदेवप्रसादेन दिव्यरूपधरा विमानारूढाः परमं वैकुण्ठमवापुरिति॥ कृष्णस्तु नंदगोपव्रजौकसां सर्वेषां निरा
मयं स्वपदं दत्त्वा दिवि देवगणैः संस्तूयमानो द्वारवतीं विवेशेति च॥ अत्र त्वयमर्थः॥ नंदादयः पुत्रदारसहिता इति श्रीमन्नंद
राजस्य तद्गेमुख्यस्य पुत्रः श्रीकृष्ण एव॥ दारास्तु श्रीयशोदैवेति प्रसिद्धमपि पुत्रादिशब्देनानन्तरूपैरेव तैः सह तत्र प्रवे

प्राइति गम्यते॥ अतो दिव्यधारानूत्सुल्लासेन तेषां स्वस्वरूपस्य परमविराजमानत्वमेव विवक्षितं॥ विमानेन तेषां परमवैकु
ण्ठप्रवेशनं च वहिरङ्गजनावंचनार्थमेव प्रत्यायितं॥ वस्तुतस्तु तेषामदृश्यवृंदावनप्रकाशविशेष एव प्रवेशः॥ वृंदावनाद्
वहिर्नापनीवाराहवृहद्गौतमीयवचनैस्तादृशतन्नित्यधामप्रकाशो दर्शितः॥ वरुणलोकादागत्य श्रीमन्नंदादिभ्यस्तेषा
मेव स्वलोकतया वृंदावन एव सल्लोकविशेषरूपस्तत्प्रकाशविशेषः स्वयमेव श्रीकृष्णेन दर्शितो न च विमानसाधन
तयान्यत्र तेनीता इति श्रीदशम एव प्रसिद्धं॥ तथा हि॥ नंदस्त्वतींद्रियं दृष्ट्वा लोकपालमहोदयं॥ कृष्णे च संनतिं तेषां ज्ञा
तिभ्यो विस्मितोऽब्रवीत्॥ ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः
इति स्वानां स भगवान्विज्ञायाखिलदृक् स्वयं॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत्॥ जनो वै लोक एतस्
मिन्नविद्याकामकर्मभिः॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन्॥ इति संचिंत्य भगवान्महाकारुणिको
विभुः॥ दर्शयामास लोकं स्वं गोपानां तमसः परं॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनं॥ यद्धि पश्यंति मुन
यो गुणापाये समाहिताः॥ ते तु ब्रह्मह्रदं नीता मग्नाः कृष्णेन चोद्धृताः॥ ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्
पुरा॥ नंदादयस्तु तं दृष्ट्वा परमानंदनिर्वृताः॥ कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः॥ अत्र स्वलो
पन्निजपदं तेषां स्वपदतया तान्दर्शयामास॥ नंदे वत्तेभ्यः पश्चाद्यतानीति गम्यते॥ ते तु ब्रह्मह्रदं नीता
इत्यात्र चायमर्थः॥ यत्र ब्रह्मह्रदे श्रीकृष्णमक्रूरः स्तुतवान् तं ब्रह्मह्रदं श्रीकृष्णेन नीता मग्नाश्च पुनस्तेनैवो
द्धृताः सन्तो नराकृतिपरब्रह्मणस्तस्य लोकं ददृशुरिति॥ यद्यपि ब्रह्मलोकशब्देन भगवल्लोकमात्रं हीतो ये ब्रह्म
लोकः सनातन इत्यनेन तत्त्वं॥ सूक्ष्मामिति तमसः परमिति सत्यं ज्ञानमिति च द्वे वचनं जितं॥ तथापि नः स्वग

तिमिति न वेद स्वां गतिमिति गोपानां स्वं लोकमिति कृष्णश्च तद्वेत्तिच श्रीगोपाललोकरूपमेव न दित्तिलभ्यते ॥
त्र न एवान्येपरिकरास्तत्र तैर्न्नदृष्टाः किंत्वात्मान एव च्छंदोभिः स्तूयमानत्वं च गोपालवापन्यादिरूपे स्तेः श्री
कृष्णस्तत्तानुरूपमेवेति कृष्णश्च तत्रैत्पनेन लभ्यते ॥ तदेवमेव तदेकरुचीनां तेषां विस्मितिः परमानंदनिर्वृतिश्च
घटते तेषां स्वलोकस्यापि तस्याज्ञाने कारणं तु जनो वा इति ॥ सालोक्यसार्ष्टिसारूप्येत्यादिपद्ये जना इति वक्ष्या
पि जनस्तदीयस्वजन एवोच्यते ॥ अत्र तु विशेषतः ॥ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं गोपाये स्वात्मयोगेन
सोयं मे व्रत आहित इति स्वयमेव श्रीकृष्णेनानंतर्भाविनमिति ॥ जनशब्दस्य लोकमात्रवाचित्वे सर्वैस्तैरेव करुणया जाते
ति सर्वेभ्य एव तेभ्यो दर्शनाप्रसंगात् ॥ मा च न जानीतेति तथा न व्याख्येयं ॥ न तस्य परमस्वजनोयं मम व्रजवासि
लक्षणः प्रापंचिकेस्मिन् लोके यान्त्रविद्याकामकर्मभिर्हेतुभिर्देवतिर्यगादिरूपा उच्चावचा गतयस्तासु
भ्रमन् तन्निर्विशेषतयात्मानं मन्यमानो दर्शयिष्यमाणां स्वगतिं न जानातीत्यर्थः ॥ मम लोकवल्लीलायावरणादे
वेति भावः ॥ यद्वा मार्थस्तु हृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते इत्यादिः ॥ न दृज्ञानादेव नंदस्त्वतीन्द्रियं दृष्ट्वा
त्याद्युक्तं ॥ तस्माद्य एव लोकस्तेषां स्वीयतया तेभ्यो दर्शितः स एव प्रापितस्तत्प्रापणे च विमानादि साधनमकिंच
त्करमेव किंतु लोकानां च मत्कार्यं तेभ्यः संगोपनार्थमेव वा दर्शितमिति साध्वेव व्याख्यातं ॥ तदुक्तं वृंदावन
मुद्दिश्य ॥ आविर्भावस्तिरोभावो भवेन्मेत्र युगे युगे इति ॥ तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषेति च ॥ अतः पुनर्व्रज
भागत्य स्थितस्य नित्यस्थित्यपेक्षयैव गोगोपगोपिकासङ्गे यत्र क्रीडतिकंसहेतिपदं विन्यस्तं ॥ अत्र हे तिवत् कंस
हेतिवत् कंसहेत्यत्र च भ्रमत एव कृष्णद्विधात तदेव ग्रन्थकृद्भिर्मा नायकेशिमथने सखिनास्मि शङ्के त्यादिषु केशिमथना ॥१४०॥

दिशावक्ताः प्रयुक्ताः संगच्छन्ते ॥ केशिवधादनन्तरं परस्परोत्साता पन्ते ॥ एवमेव केशिमथनमुदारमित्यत्रश्रीज
यदेव चरणैरप्यभिप्रेतं ॥ अतएव ॥ तत्रश्रीराधादेव्यास्तन्नन्नायिकात्वं वर्णयद्भिस्तत्रच श्रीकृष्णनित्यप्रेयसीत्व
द्यक्तिमभिप्रयद्भिस्तैः सपत्नीभिरेवकृता विप्रारसहेतुत्वेन दर्शिताः ॥ पतिमन्याः परे सन्तीत्यपिनोद्दिष्टं ॥ तदेवं
स्थिते तदानीं श्रीव्रजदेवीनां तत्प्राप्तिक्रमस्त्वेवं विविच्यते ॥ तत्र यथा मथुराप्रस्थाने तास्तथा तत्पतीर्वीक्ष्येत्यादावा
यास्यद इति दौत्यकैरितिसंदिष्टं तया इतान्तरैरपीति गम्यं । यथोक्तं ॥ धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान्कथंच
न प्रत्यागमनसंदेशैरितियथाच ॥ वृष्णीनां सम्मतो मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो
बुद्धिसत्तमः ॥ तमाह भगवान्प्रेष्ठं भक्तमेकान्तिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ गच्छो
द्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ॥ ता मन्मनस्का मत्प्राणा
मदर्थे त्यक्तदैहिकाः ॥ मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥ ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ॥ मयितः
प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरन्त्योंग विमुह्यन्ति विरहौत्कंठ्यविह्वलाः ॥ धारयन्त्यतिकृच्छ्रेण प्रायः प्राणा
न्कथंचन प्रत्यागमनसंदेशैर्वल्लव्यो मे मदात्मिका इति प्रकरणेन स्वस्य तासां च पुनर्वैयग्र्येव्यक्ते श्रीमदु
द्धवद्वारा पूर्ववत्पूर्वेण भवतीनां वियोगो मे इत्यादिना संदिश्य प्राप्य परितुष्टोन्नरतीस्म छंदस्य त्रिरात्र्यापि कृस्मरति
विशिष्य संदिष्टं मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् ॥ अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथेति ॥ अथश्री
संकर्षणद्वारापि संदिष्टं ॥ यथान्वतद्दस्मिन्नंश्रीशुकेन ॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः ॥ सान्त्वयामास भगवा
न्नानानुनयकोविदः ॥ यथा श्रीपराशरेण ॥ सन्देशैः साममधुरैः प्रेमगर्भैरगर्वितैः ॥ रामेणाश्वासिता गोप्यः कृष्णस्या

ति॥ मनो हरेरिति॥ स्वयमेव कुरुक्षेत्रयात्रायामुपदिष्टं॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते दिष्ट्या यदासीन्मत्स्ने
हो भवतीनां मदापन इति॥ तच्च यत् किंचिदव्य उपदिष्टं तत्रापरितुष्टानां तासां विज्ञप्तिमाह॥ आहुश्च ते नलिननाभ
पदारविंदं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात्सदा न
इति॥ अयमर्थः॥ हे नलिननाभ तव पदारविन्दं नोऽस्माकं मनस्युदियात्॥ ननु परमानुरागवतीनां भवतीनां भवती
नां किमत्राशंक्यं तत्राहुः॥ योगेश्वरैरेव हृदि विचिन्त्यं नास्माभिः कथं अगाधबोधैः अदर्शनेऽप्यक्षुभितबुद्धिभिः न
त्वस्माभिरिव तद्विचिन्तनारंभ एव मूर्छोगामिभिः॥ तदुक्तमुद्धवं प्रति स्वयं श्रीकृष्णेन मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः स्मरन्त्यंग विमुह्यन्
तीति॥ ननु तद्विचिन्तनमेव तेषां संसारदुःखमिव युष्माकं विरहदुःखं शमयेत्॥ तत्राहुः संसारकूपपतितानामे
वोत्तरणावलम्बं न त्वस्माकं विरहसिंधुनिमग्नानां॥ तद्विचिंतने विरहदुःखवृद्धेरेवानुभवात्॥ जन्तु कुरुक्षेत्र इव
द्वारकायामप्यागत्य मत्पदारविंदं पश्यत यावदहं तत्राममागमी तावच्छ इत्याहुः॥ गेहं जुषां स्त्रीत्वादेहलोकाधीना
नामित्यर्थः॥ तस्माद्यदि स्वयमेव नत्रागात्य स्वपदारविंदं दर्शयन्ति तत्र भवन्तस्तत्रापि नित्यमेव न दैवास्माकं निस्तारर
निभावः॥ अथ ततः किं जातमिति श्रोतृणामुत्कंठां चित्तं समाप्तं तदध्यायोपि स्वयमेव श्रीवैयासकिराह॥ तथा
नुगृह्य भगवान् गोपीनां स गुरुर्गतिः॥ युधिष्ठिरमथापृच्छत् सर्वांश्च सुहृदोऽव्ययमिति॥ यथाताभिरभिप्रेतं
तथानुगृह्य॥ तथानुग्रहमेव व्यनक्ति॥ गोपीनां स गुरुरभीष्टसंपादनायोपदेष्टा॥ अभीष्टमेवाह गतिर्गम्यत इति
परमफलरूपरत्यर्थः॥ तच्चैवमप्यत्र भक्तानां धारणामन्तर्यं [illegible]श्चिरं द्वारोपविष्टमपि श्रीयुधि
ष्ठिरमथ तदनन्तरमेवापृच्छत्॥ किं वक्तव्यं तमेवेति॥ सर्वांश्च सर्वानपि सुहृद इति अयमहाविरहमूर्त्तीर्थ यथा

तासां तं प्राप्तुस्तयास्वयमेव श्रीकृष्ण उद्धवं प्रतिप्राह । रामेणसार्द्धं मथुरां प्रणीते श्व फल्किनामय्यनुरक्तचित्ता । विगाढभा
२ वेन मे वियोगतीव्राधियोऽन्यं ददृशुः सुखाय ॥ तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण । क्षणार्द्धवत्ताः
पुनरङ्ग तासां हीना मया कल्पसमा बभूवुरिति पूर्वं खलु प्रनाय स्वस्य प्रस्थापनेमपि ताः प्रेयसां प्रेष्ठ रत्यादेः वर्त्तमान
प्रयोगएव कृतः संप्रतित्वत्रातीत प्रयोगएव क्रियते ॥ ततश्च ददृशुरिति बभूवुरिति चातीतनिर्देशाद्धुनातु ताः तथा
न पश्यन्ति न च तथा भवन्तीति नास्त्येव वियोग इत्यर्थः ॥ ननु तासां तदा प्राप्तिः प्रकटं न दृश्यते कथं सा जाता । उच्यते म
या सह वृन्दावनगताप्रकट प्रकाशविशेषमेव ताः प्राप्नुरित्याह ॥ ता नाविदन्मय्यनुषङ्ग बद्धधियः स्वमात्मानमदस्त
थेदं यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥ तादृशमन्मह्याविरहसंतप्ताः सत्यो मयि योऽनुसङ्गो हन्त
वर्द्धे हृत्वा नत्र गते मयि यः पश्चात् ज्ञातः साक्षात्संगः स माधेर्दृष्टान्तपि ष्प माणत्वान्नतु समाधिरूपस्तेन बद्धाधीर्या
सां न यान्वनाः सत्यः स्वं ममतास्पदं तथात्मानमहंकारास्पदं च कर्म्मभूतं न विदुः अप्रकटलीलागतं नपेदं प्रकटली
लागतं वा यया नाविदुः किन्तु द्वयोरैक्येनैव नाविदुरित्यर्थः ॥ नन्वस्तु तामच रूपं चेति समाहारद्वन्द्वेन नामरूपात्म
न्यप्रकाटप्रकाशे प्रविष्टा इव अप्रकटप्रकाशगतं खलु द्विविधं ॥ तासामहंकारास्पदं ममतास्पदं चेति ॥ तत्राहं
कारास्पदे प्रविष्टा इति वस्त्वभेदेन योजयति । यथा समाधौ समाप्नुपाधौ तुरीयाख्या त्मनि मुनयो जाग्रदाद्युपा
धितया विष्वंते । जसमाप्ता रूपा सनीनामात्मानः प्रविष्टा इव भवन्ति न तु प्रविष्टाः किंतु तेषा तुरीयं त्रिषु संततमि
ति न्याये नोपाधिनैव तुरीयाद्भिन्नत पाख्या तानां तत्र उपाधि परित्यागएव प्रवेशतयोपचर्य्यते तथा तासां मत्प्राप्त
न्तराय तत्तत्परित्यागएव प्रवेशतयोपचर्य्यते इत्यर्थः । अथ ममतास्पदे प्रविष्टा इवेत्यपि सम्यगंशाप्रवेशेनपो

142

॥उ०नी०॥ ग यति ॥ यथा स्थितो येन घः प्रविष्ट इव भवन्निन तु प्रविष्टः पृथिव्यामविच्छेदात् ॥ तद्वन्नयोः प्रकाशयोर्मिथो वि
॥१४२॥ च्छेदाज्ञानात् प्रविष्टा इवेति ॥ तदेवमयमपि ग्रन्थकृत्पक्षः श्रीभागवतसंमततया साधितः ॥ पुनरेवं विमर्श्य
ते यं व्रजे तत्प्राप्तिः कीदृशत्वेन ग्रंथकृन्मता ॥ पतित्वेनोपपतित्वेन वा ॥ उच्यते ॥ ललितमाधवे ज्ञातेन तद्वीयेन
हार्देन पतित्वेनैवेति ॥ प्रकारांतरेण तत्संबंधाकरणेन तत्रैव रसस्य प्रतिष्ठेति प्रकटीकरणात् ॥ तस्यैवान्त्यो
दाहृतत्वाच्च ॥ तद्विवाहनिर्वहणा कृस्पर्शणमनोरथ इति नामकरणात् ॥ नच पूर्ण्यामेव तासां विवाहः संभवति न तु
व्रज इति वक्तव्यं ॥ यदि स्वयमेव श्रीव्रजेश्वरी तत्र गतात् तत्संबंधेनान्याश्च व्रजप्रामाणिकास्तदा पुरीव्रजयोः को
भेदः ॥ यदि च श्रीकृष्णेन तासां मूढानां व्रजानयनं श्रीव्रजेश्वर्यं च नएवानुमतं ॥ तदा वृंदावने तासामानय
नानन्तरं स्यात् नान्यथा ॥ श्रीमद्भागवताभिप्रायेणाप्यत्रैव रसः संपद्यते ॥ यतः श्रीकृष्णस्य मथुराप्रस्थाने निवा
रयाम समुपेत्य माधवं किं नो करिष्यन् कुलवृद्धबांधवा इति विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर
माधवेति ॥ यस्मात् सांव्यवहारस्तेन प्रथममनएव ताउढ इति भावाच भूवुः परपरस्तु नराः ॥ ता मन्मनस्का म
त्प्राणा मदर्थे त्यक्तदैहिका इति कृष्णेनैव व्रजायाते उद्धवे त्यक्तलौकिका इति गतह्रियत इति काचिन्मधुकरं दृष्ट्वे
तिया इत्यस्य जं स्वजनमार्यपथं च हित्वेति मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄः प्रियदर्थे जहिम दाशार्हदु
स्त्यजान् स्वजनान् प्रभो इति चश्रयते ॥ तस्मात्तासामसंख्यानां तादृशी रतिर्ज्ञचरी तु मशक्यैव जातेति यदि
ता सामन्य भर्तृकार्तृका त्वं व्रजे मिथ्यात्वेन व्यक्तं स्यात्तदैव कृष्णसाक्षात्पयेन रसः संपद्यते ॥ अन्यथा तु महावैरस्य
मेव स्यात् ॥ तत्र तदैश्वर्यज्ञानमय्यां परीक्षित्सभायां यथा ॥ तदैश्वर्यज्ञापनेनैवोपपत्त्यं परिहृत्य सरसतास्थापि

तातया धार्म्मिकत्लोकलीलामयां श्रीमद्व्रजसभायामपि धार्म्मिकरीत्यैव परिहृतसास्यापयितव्या ॥ तदेवं योगमाया
मुपाश्रितेत्यादिना सूचयन्नस्वलक्षणायेति न्यायेन परस्या मायायाः सोपप्रपंचासेवसमाधात्रीयथा निजेच्छरलीला
कौतुकार्थं तत्तत्कल्पनां कृतवती मध्ये चासूयापरिहारार्थं समाहितवती च सत्वे तस्मिन्नुद्वांदे निःशेषमेव समा
हितवतीति गम्यते ॥ यतोऽप्रकटलीलामनुगतानामपि तासां तत्त्वीयात्वमेवानुगतं ॥ तथाहि ॥ ब्रह्मसंहितायामानं
दचिन्मयरसेत्यादौ ताभिर्निजरूपतया कलाभिरित्यत्र तासां कलात्वेन निजरूपात्वप्राप्ते निजरूपतयेत्युक्तिः
स्वीरूपतां निगद्य परकीयात्वं परिहृतवतीति ॥ तस्य च तत्त्यतित्वमेव गौतमीये श्रीमद्दशार्णव्याख्यायां मायाप्रेर
कतामये ऐश्वर्य प्रतिपादकपक्षद्वयस्तत्कात्तृतीयपक्षतया प्रोक्तं ॥ अनेकजन्मसिद्धानां गोपीनां पतिरेव वानं
दनन्दन इत्युक्तः स्वे लोकाख्याने देवर्द्धन इति ॥ अत्रवर्द्धनिमे व्यतीतानि जन्मानि तव चार्जुन इति वत्तत्र नादिजन्म
सिद्धानामित्यर्थः ॥ नदेतद्विचार्य्य पम्यक्कृद्भिरपि तत्वयुत्वमत्र यत्प्रोक्तमित्यादौ नेष्टायदद्भिः निरसेकैविभिरित्या
दौ चावतारसमयएवोपपतित्वपरदारात्वव्यवहारस्तदितरसमये तु नेति स्वीकृतं ॥ तदेतच्चतानाविदन्मयथ्य
न्तु षकृद्वद्वधियइत्यस्यान्ते श्रीभगवता कृष्णेन स्वयमेव दर्शितं ॥ मत्का मारमणं जारमत्स्वरूपविदोऽवलाः ॥ ब्रह्म
मां परमं प्रापुः सङ्गाच्छतसहस्रशः इति ॥ अपमर्थः यथाभीष्ममद्धारं दर्शनीयं कटं करोतीत्यत्र कृतिक्रियावि
शेष्यमनुगच्छन्ती विशेषणान्यप्यनुगच्छति ॥ कटं करोति तं च भीष्ममित्यादिरीत्या ॥ तथात्रापि ब्रह्मप्रापुस्तच्च
परमं तच्च मां मद्रूपमित्यादिरीतिरवगन्तव्या क्रमस्यात्रार्थिकत्वात् ॥ पञ्च तां विविधाः पाकाः सूपान्नाः पापसाद
यः ॥ संपावायपशस्कृत्यः सर्वं दोहअग्न्याहितामित्यत्र अग्निहोत्रं जुहोति यवागूं पचतीत्यादौ च वव वत्त वत्वेन दृष्ट

143

उ॰नी॰ ॥ वात् ॥ तथाहि ॥ ताइति पूर्वतोनुषज्यते ॥ ताब्रह्मप्रापुः ॥ किं निर्विशेषतया विर्भूतं न किंतु परमं ॥ परमात्मस्मोर्येस्मिन्
॥१४३॥ न्नदिति निरूपणाद्वा ब्रह्मणो हि प्रतिष्ठाहमिति प्रामाण्येन वा श्रीभगवद्रूपमित्यर्थः ॥ तादृशत्वं च प्रभुमाश्रयः सचिन्त्य
सर्वगस्य तथात्मनइति श्रीविष्णुपुराणादीत्यान्यत्रापि भगवदाविर्भावे संभवतीत्याशंक्याह मामिति ॥ तदुक्तं ॥ म
य्यावेश्य मनः कृष्ण इत्यादि च ॥ मयि भक्तिर्हि भूतानामित्यादि च ॥ तत्र च मां भावविशेषमयपमयभेदेन द्विधा प्रा
पुरिति बोधयितुं तासां तत्तद्विशेषणसाहित्येन स्वविशेषणद्वयमाह मत्कामा रमणमिति जारमस्वरूप
विदइति च ॥ रमणशब्दः पत्याबेव रूढः ॥ जारशब्दस्तूपपतावेव ॥ रमणं स्यात्पटोलस्य मूलेपि रमणः प्रि
येइति विश्वप्रकाशः ॥ धवः प्रियः पतिर्भर्तेत्यमरः जारस्तूपपतिः समाविति च ॥ ततश्चास्वरूपविदइ
ति स्वरूपं नित्यमेव मत्प्रेयसीत्वलक्षणमवतारसमये मद्दीपलीलाशक्त्या मोहितत्वान्नविदन्ति यास्त
थासत्यो जारं ॥ जारबुद्धिवेद्यं सन्तं मां प्रापुः ॥ तथापि मत्कामाः मयिकामः कथमस्माकमन्यस्मिन् पति
त्वे स्वप्रवृद्धीलीयेत श्रीकृष्ण एव जागरणे वर्त्तत्याद्दुर्भवेत् इत्यभिलाषोपासां तथा सत्यो मां रमणं प्रापुः
तादृगभिलाषश्चासां स्पष्टमेवोपलभ्यते ॥ यथा भ्रमरगीतायां ॥ अपि बत मधुपुर्यामार्यपुत्रोधुनास्तेइत्य
त्र तस्य स्वीयाएव वयमिति व्यज्यते तत्र च किंकरीणामिति प्रणामस्तुंदरने द्रास्य इति वेदे न्यात किं करीत्वेनापि
निश्चितस्य भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदान्विस्यतेन तद्देवासावसंकोचाङ्गीकारेण कदासांगीकरि
ष्यतीति ॥ राधा स्वयमेव प्रार्थितवतीति ॥ श्रीभगवतास्वमतं तं द्देवोद्धवायोपदिष्टं वक्ष्यामे मद्दाम्भिकार ॥१४३॥

ति ॥ तदेवं जारबुद्धेर्हेयत्वं रमणबुद्धेस्तूपादेयत्वं ॥ जारबुद्धिर्वैद्यमाख्याय श्रीस्वामिभिरवगमितं ॥ भर्त्तृभिन्ना
षप्राप्तिश्चावश्यमवगन्तव्या ॥ ये यथा मां प्रपद्यन्ते इति श्रीभगवद्गीताभ्यश्च घेति यद्भिन्नाधेणैवेवार्थः तत्क्र
तुन्यायात् ॥ स्वयमेवेदं दृष्टान्तद्वारा बोधितं ॥ मय्यावेश्य मनः कृष्णे इत्यनन्तरं यामयाक्षी इता रात्र्यां वने स्थि
न्न व्रजस्त्र्यास्थितानां ॥ अत्तव्रुरासाः कल्याण्यो मायुर्मह्वीर्य चिन्तयेति ॥ अत्र खल्वन्तर्गृहगतानां तासां तान् पतीन्
तांश्च देहांस्त्यक्तवतीनामौपपत्यं न संभवतीति ॥ हे कल्याण्य इत्यनेन भवतीनां मनन्द्वदेहपरित्याग इति सुवे
शिष्यमवगमितं ॥ तदेतदभिप्रेत्यैव वशर्वमपि तमुद्धवं प्रति ॥ धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथंचन प्र
त्यागमनसंसन्देशैरित्युक्त्वा तासां प्राणधारणे आग्रहो दर्शितः ॥ जारत्वेन रमणत्वेन च मत्प्राप्तेर्मम कारुण्य
स्तुपरमसहायमित्याह ॥ अबला इति ॥ न विद्यते बलं मत्साहाय्यं विनान्यद्यासां तादृश्य इति ॥ अहो आस्तां
त्यप्रेयसीनां वार्त्ता तासां संगाद् दृष्ट्वात्र पिशतसहस्रशो। पितथा तथा मां प्रापुरिति ॥ अत्र चेदं विविच्यते तासां
नित्यप्रियाणां भवनरण वशाद्विस्मृतात्मस्थितीनां मध्यन्तःस्वस्वभावादद्य विजितिरतिश्रीभर्त्तानित्यकान्ते वि
ध्वंसतानामनुध्यानात्परसदनगतिक्लेशभाजां वरीतुं तं तच्छ्वासापि नस्यादहहसहफलाकः प्रतीयान्न तत्र ॥ न
स्मात्सत्वितमाधवस्वत्रापि विवाहघटनेवैसमंजसा ॥ यतश्च दाम्पत्यं व्रजसुभ्रूवामघजितायज्ञातमेत
त्स्वरंकाव्यस्य प्रथते न निर्वहणकृतं किं त्वेष रागस्य च ॥ रागः सोप्यनुपद्रवस्थितिमिथः ॥ संगास्पदस्तन्यजन्ना
त्मीपास्पदमन्तरा विविवहनं दृष्ट्वाद्युपाजन्मतां ॥ प्रागुरप्रियता ततो गुरुजनध्वस्तप्रयत्नात्मतातत्पश्चाच्छ्रुति
लोकत्वं चिरमसाद्गुणा प्रियाङ्गीकृतिः ॥ तस्माद्दूरमहावियोगचिरतान्त्यान्तमुद्वाहतः प्राक्ष्ञ्चेन्मिथुनमिथोहरि

रमारूपं स्तु स्वं किं परं कृष्णं कान्तयानुपेत्य पुरतः स्वं नित्यकान्तं तु तास्तत्राप्यन्यकरे निपत्य च वल्लान्त्रिर्वा ह्यथ
मे निजं ॥ तत्रापीष्टमस्तु कथं च न रहः प्राथापि विश्लेषिताः पुण्यात्तं पतिमेत्य सर्वजगन्नाम न्तर्यधुर्निर्वृति ॥ नाम्ना
र्यासह सुतानुरागविभुता मीनिर्मिता किं तु मीर्लिग्धा सा न्त्वन्तु वेनि नत्र वल्लता ज्ञानार्थमन्तः कृता ॥ तज्ज्ञानं यदि धर्म
से तु दत्तना न्तस्यास्तदा विस्तृतिस्तद्द्वाति यथा परीक्षिन्नचरोप्यग्नो मुहुर्वै श्रपने ॥ कंसारे रकुतोभयस्थान
भयं न तन्न कृतं दस्य वा किं तु ह्रीः य रमस्ति सहुणमणेस्तन्तुमत्रु वा किं पुनः ॥ तत्र ह्री इ रितोऽत्रवायदित दानिन्दा
स्पदं यद्यसो गोप्येशर्म णीगोपन स्थितिमयी उभात्यद्दस्त हितु ॥ अन्याः सन्तु सहस्रशः पतिपरा नाम्नः स्तुवे
पानिजं त्रीकं धर्ममपि श्रितानसहसा सस्त्वं पदीतिं केवलं ॥ गोपीनां निजनप्रसिद्धमपियास्तंतं विहा
यस्फुटं निर्णीयस्वरतिप्रतीतिविभवात्कृष्णं पतिं भेजिरे ॥ सावित्री ब्रह्मणः स्त्री हिमगिरितनुजा चंद्रमौलेस्तथा
मा विष्णोः कृष्णस्य रुक्मिण्यपि जगति भवेद्वादमस्यणोः स्तु स्वाय ॥ रूपं स्वस्यापि विश्वापनमयमभितः शोभ
यन्त्स्वीयमासीत्प्रासेयासां रुचा तायदि न हि विवहेद्दस्तु राधा तु मर्द्धिरिति ॥ अथ कंसवधात्प्राचीनानां तीला
नांस्वयस्तन तामत्वा यदुपासनं कुत्रापि क्रियान्ते ॥ तत्र वल्लु एवं विहारैः कौमारैः कौमारं जह तु व्रजे निलायनैः
से तु वं धेमर्कतो ह्रवनादिभिरित्यादीव तारत्नीलान्तरव न्त्र्वं मती तामपि तां तां निजलीलां भक्तविशेषु भुरो
धेन तदा तदा प्रकटीकरोतीत्येवमन्तव्यं ॥ त्वं भक्तियोगपरिभावितहृत्सरोजआस्से श्रुतेक्षितपथो ननु नाथ पुंसां यद्यद्धि
यात उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेत्यादेः तत्र वात्सल्यलीलोल्लासनायह स्तान्यपि दृश्यन्ते ॥
किं तु श्रुतेक्षितपथत्वेनैव ताद्दृश्यानस्वमनोरथमात्रकल्पितत्वेनेति गम्यते तत्र च क्रुपास्थिताया अपि संभोगलीलायाः संप

न्यत्वमेवसंमतं॥ ननुसमृद्धिमत्त्वं महाप्रवाससंस्कारानन्तरभावित्वाभावात्॥ अतएवकासांचिल्लीलानांप्रकटप्रकाशगत
तल्लीलातुल्यानांतन्नर्मसंत्रोपासकसंप्रदायाविच्छिन्नपरंपरानुरोधेननित्यास्थितिरवगम्यते॥ ननुसर्वासामपिप्र
कटलीलानांकालिपद्रुदप्रवेशलीलानांमहादुःखमयत्वेनकासांचिदन्यासामपिमुहुरागंतभयव्याकुलीकृतत्वेन
प्राकृतत्वेनप्राकृतमिश्रत्वेनचविरोधात्॥ योगएवभवेदेषविचित्रः कोपिमादनः॥ यद्विलासेनशोभन्तेनित्यलीलाःसहस्र
धेत्यत्रयोगएवेतिसुखदानामेवतासामुपादानेनसहस्रधारतिसंख्योल्लेखेनचततप्रत्याख्यानात् प्रत्यएवपितासांनित्य
त्वेचित्रतुल्यताप्राप्तालीलात्वहानाच्च॥ हित्वंगोकुलमंडलस्यवल्लवतकंसादिदुर्जीवनंतद्दूरत्लेशकुलंचकृष्णस्यदृशा
यन्नत्सख्यान्निजं॥ तत्रखंप्रथमंयथावरतयानवंकृवंनतसरंतश्रुम्यस्थितिचिन्तनादस्मममूरण्याश्रयंतंनुमः॥ कृष्ण
१॥ छन्नप्रकाशभेदेनकेश्चिदेषांद्विरूपता॥ इष्टाप्यत्रनहिप्रोक्तानात्युल्लासकरीयतः॥२॥ अथयोगोणाः
स्वप्नेप्यन्निविशेषोस्यहरेर्गौणइतीर्यते॥ स्वप्नोद्विधात्रसामान्यविशेषत्वेनकीर्त्तितः॥ सामान्यःसतयः
खस्ताखिलक्लेशंकृष्णाद्यंगोकुलंस्मरन्॥ नद्वारकृष्णप्रियावर्गेस्मरन्नयस्तंसंस्तुवीतकः परसपरिपाकस्तुक्रमलीला
यामेवक्रमते॥ श्रीभागवतादिप्रकाशकप्राचीनपरमभक्तानांविदग्धमाधवादिप्रकाशकतादृशग्रंथकृतांचात्रैवा
वेशदर्शनादत्रैवग्रंथेचास्याएवनिर्वाहणात्॥ तथाहि॥ रसिकजनस्तुखार्थेसाधयामासत्रशश्वतक्रममनुरसशृंस
दवन्कृष्णचंद्रःक्रममनुरसयन्यःस्फूर्तिमाप्नोतिस्फूर्त्यासकलमिहपरंस्यात्तत्रवैदग्ध्यमस्य॥ तथाचोक्तंप्रपंचनि
ष्प्रपंचोपीत्यादि॥ ॐ॥ इतिमधुरसपरिपाकविवेकविवृत्तिः॥ १॥ छन्नप्रकाशभेदेनेति॥ एषांसंभोगादीनांस्वीयात्वपि
छन्नेतेवरसरेतिद्विरूपतानप्रोक्तेत्यर्थः॥ २॥ नदेवंसर्वप्रबंधस्यरसपरिपाकंसमृद्धिमन्नमुक्तानुयोगेणास

145

क्षिप्तादिच्चतुर्णामाभासानप्याह अथ गोण इत्यादिना गौणो मुख्यसंभोगाभिधेयताशून्य इत्यर्थः ॥ ३ ॥ नांमानाम्निज्वा
लाअससमयेनवसरे ॥ ४ ॥ समयधर्म्म आयास्यामीति तस्य प्रतिज्ञारूपो धर्म्मः ॥ समयाः शपथाचारकालसिद्धांतसंवि
द इति नानार्थवर्गात् ॥ स्वप्नकपटात् स्वप्नरूपो यः कपटस्तं कृत्वापदिहायातः सन्वल्लभो मां रमयति न तु जाग

रूवं कापितो अभिचारिषु ॥ विशेषः स्वल्पनागर्य्या निर्विशेषो महाद्भुतः भावोत्कर्षमयो ह्येष चतुर्द्धे
ऽवेव्यमतः ॥ तत्र स्वाप्नसंक्षिप्तः ॥ यथा ॥ विहारं कुर्वाणस्तरणितनयातीरविपिनेन कुंभोदेश्रेणीम
धुरिमस्विद्युतिभरः ॥ विदग्धानां चूडामणिरनुदिनं चुम्बति मुखं मम स्वप्ने कोपि प्रियसखि तीयात्रव
युवा अथ स्वप्नसंकीर्णः ॥ ३ ॥ सखि कुद्दामा भूर्त्तपुरपिनदोषः सुमुखि मेनमानाग्निज्वालामशम
यमसमये ॥ स धूर्त्तस्तेस्वप्ने व्यधित रससृष्टिं मयि नथापतो विस्तीर्णापि स्वयमियमयासीदुपशमं ॥ अथ
स्वाप्नसंपन्नः ॥ यथा हंसदूते ॥ ४ ॥ प्रमातो मां हित्वा यदि कठिनचूडामणिरसौ प्रयातु स्वच्छंदं मम स
मयधर्म्मः किलगतिः ॥ इदं सोढुं कावा प्रभवति यतः स्वप्नकपटादिहायातो वृन्दावनभुवि वल्लभो मां
रमयति ॥ अथ स्वप्नसमृद्धिमान् ॥ यथा ललितमाधवे ॥ ५ ॥ चिराद्द्य स्वप्ने मम विविधयत्नादुपगते
प्रपेदे गोविन्दः सखि नयनयोरंगनभुवं ॥ गृहीत्वा हाहन्त त्वरितमयतस्मिन्नपि रथं कथं प्रत्यासन्नः
स खलु परुषो राजपुरुषः ॥ ६ ॥

रमेव यकवं दृष्टोपित्वायातः सन्निति स्वप्नप्रत्याम कंदर्पनारूपमिदं का वा सोढुं प्रभवति न कापीत्यर्थः ॥ ५ ॥ चिरा
द् द्येस्यत्र समृद्धिमत्त्वं रवौ द्वैएवेयभोगातिरेकं पारं असाध्वसादिरहितं च तत्क्षण वल्लभस्तु स्वप्नेय येष्टं संभावयितुं शं ।

॥ १४५ ॥

कृत्वा द्वगन्तव्यं॥ गृहीत्वेत्यादिकं तु नात्रोदाहरणीयं॥ भाविनामा हि विप्रलंभः खल्वयं॥ पुरुषः कठिनः सोक्रूरः॥ त
दिदं वा तदुदाहरणं॥ यदा तं कारूषं पथि हतवता कंसरिपुणा व्रजे प्रत्यायाते प्रमदप्रदतो व्याप्तमखिलं ततः प्राक्
यद्बाधा विधुमुखि मनोराज्यवल्लितं जजल्पस्वप्नान्तस्ता दृष्टमुरूपश्चित्रयति नः॥ ६॥ स्वप्नोयं द्विविधः जाग
रायमाणः स्वप्नः स्वप्नायमानो जागरश्चेति॥ तत्र शर्वोद्दर्शितः॥ उज्ज्वरं स्थापयति तु स्येति द्वाभ्यां॥ ७॥ उभयथारजो
तु स्य स्वरूप एवायं प्रोद्यनश्चनोर्द्वयोरपि॥ ऊषानिरुद्धयोर्यद्वत्क्वचित्स्वप्नोप्यबाधितः॥ श्रुत
एव हि सिद्धानां स्वप्नेपि परमाद्भुते॥ प्राप्तानि मण्डनादीनि दृश्यन्ते जागरेपि च॥ ७॥ अतीत्य तुर्य्या
मपि मं[illegible]तानां तां पंचमीं प्रेममयीमवस्थां॥ न संभवत्येव हरिप्रियाणां स्वप्नो रजोवृत्तिविजृंभि
तो यः॥ ८॥ इत्येष हरिभावस्य विलासः कोपि पेशलः॥ चित्रस्वप्नमिवातन्वन् तत्प्रसंगमयत्नले
६॥ अथैतेषु निरूप्यन्ते तद्विशेषाः सुपेशलाः॥ येनुभावदशामस्याः प्राप्नुवन्ति रतेः स्फुटं॥ १०॥
नेते संदर्शनं जल्पः स्पर्शनं वर्त्मरोधनं॥ रासवृन्दावनक्रीडायमुनाद्यंबुकेलयः॥ नौखेलालील
वृत्तिरूपो नस्या दृत्याहव्यतीतेति॥ ८॥ तर्हि की सा वित्यत्राह इत्येष इति॥ तस्मिंश्च तद्विलासे श्रीकृष्णसंगमस्तु
यथावदेव न तु शर्वदर्शिना क्रूरागमनवदन्यथेत्याह चित्रेति॥ ९॥ तदेवं संक्षिप्तादिसंभोगभेदान्दर्शयित्वा ते
षां च तद्विधानामपि भेदान् दर्शयितुमाह॥ अथेति॥ एतेषु संक्षिप्तादिषु यथायथं सर्वेष्वेव निरूपितेष्वपि एतेषां वि
शेषा निरूप्यन्ते॥ तेच वि[illegible]षाणामंगानि॥ किन्तु कार्य्या इत्याह येइति॥ १०॥ केनेतत्राहतेति ति॥ ११॥ ऽऽऽऽ॥

तत्र परस्परगोष्ठी द्वाभ्यामाह धर्षणेनेति ॥ कुलस्त्रीणां धर्षणेन कृतेन भुजंगेश शिरोमणे राजः कथं क्षमः स्या-
त् धर्षणेन निर्वाहाय योग्यः स्यात् ॥ न स्यादेवेत्यर्थः ॥ कुतस्तत्राह यदेता इति ॥ नाप्नोतीति छेदः पक्षेन कुलस्त्रीणां
धर्षणे भुजंगेशः सर्पराजः कथं न क्षमः स्यात् किन्तु स्यादेवेत्यर्थः ॥ तत्र हेतुमाह यदेता इति ॥ अत्र त्वाप्नोनीति छेदः
अभियोगपक्षे तु कुलस्त्रीणां धर्षणे शिरोः राजः कथं न क्षमः स्यान् किन्तु स्यादेवेत्यर्थः ॥ तत्र हेतुमाह यदेता इति

याचोध्यं घटः कुंजादिस्तोनता मधुपानं वधूवेषधृतिः कपटसुप्तता ॥ द्यूतक्रीडापटाकृष्टिस्सुमा
श्लेषो नखार्पणं ॥ विंवाधरसुधापानं संप्रयोगादयो मताः ॥ तत्र संदर्शनं यथा ललितमाधवे चलाक्षि
गुरुलोकतः स्फुरति तावदन्दभयं कुलेस्थितिरलं च मे मनसि तावदुन्मीलति ॥ चलन्मकरकुंड
लस्फुरदपांगरंगस्थलं न यावदपरोक्षतामिदमुपैति वक्त्राम्बुजं ॥ अथ जल्पः ॥ जल्पः परस्परं गोष्ठी
वितथोक्तिश्च कथ्यते ॥ तत्र परस्परं गोष्ठी यथा ॥ दानकेलिकौमुद्यां ॥ ११ धर्षणेन कुलस्त्रीणां भुजंगेशः
क्षमः कथं ॥ यदेता दृशानेरेषदृशन्नाप्नोति शोभनं ॥ १२ अप्रौढद्विजराजराजदलिकान्तश्रीविभूति
रुचां न त्वामात्मनि कृष्णवर्त्मविलसद्दर्पिर्विशारवांचिता ॥ कंदर्पस्य विदग्धतां विदधतीनेत्रांचलस्य विषा
त्वेरा धेहि शिवमर्जिरि नुरसिमां भोगी द्रुमं गीकुरु ॥ वितथोक्तिर्यथा तत्रैव ॥ १२ ॥ अत्र त्वाप्नोनीति छेदः दृशानेव
मद्गुःतं धाप्नोतीत्यर्थः ॥ १२ अप्रौढः स्वल्पकुलो यो द्विजस्य द्रः तद्वत् राज तस्मैलिकं ललाटं यस्याः ॥ पक्षे अप्रौढेन द्वि
जराजेन चंद्रेण राजदलिकं यस्याः ॥ आत्मनि देहे न त्वां स्त्व्यां रुचां विभूतिं वैभवं लब्धप्राप्ता ॥ पक्षे रुचां त्वां विभूतिं भस्म

हृस्तस्य वर्त्मनि विलसन्तीर्हृष्टिर्यस्याः॥ पक्षे कृष्णवर्त्मा वह्निः विशारवा सखी॥ पक्षे च विशारवः स्कंदः विदग्धेतां वैदग्धी
पक्षे विशेषेण दग्धतां॥ त्विषा शोभया॥ पक्षे अमया॥ शिवमूर्त्तिमेऽङ्गंतरूपा॥ पक्षे भवशरीरं॥ भोगिनां विषयासक्तानां
पक्षे सर्पाणामिंद्र॥१४॥ जैनदीक्षामिति तद्दावराग्न्यावस्थात्वमित्यर्थः॥१४॥ काचिद्दधिकक्रोडामगधत्त घुदरि हस्तनी

अस्मिन्नद्रोक तिनहिमया हन्त हारा द्विविनं हारं हारं हरिणानयनाग्राहिता जैनदीक्षां॥ याः का कृष्णसंगि
नवस्नाः पत्रद्वानेनदी नास्त्यूर्णोद्गुरा दन्तुजग हिरे प्रौढवल्लीस रवभिः॥ अथ स्पर्शनं यथा॥१७॥ नकुरुश
पथमस्य स्पर्शतो दूषितो अरसि भुजभुजगे नत्वं भुजंगाधिपस्य॥ तनुरनुपमकं पास्वेदमम्बुधिरन्तो
कपटिनिपरितस्ते परस्परो मां चितास्ति॥ अथ वर्त्मरोधनं यथा विदग्धमाधवे॥१८॥ परीतं शृंगेण स्फुट
तरशिलाश्रणमल्लस्त्वं च वल्लवेन्द्र त्वं वंश अति करलसन्मेखलमम॥ अतिक्रमोत्तुंगं धरणीधरमग्रे कप
मितस्त्व यागन्तुं शक्या तरणिदुहितुस्तीरसरणि॥ अथ रासो यथा॥ हरिर्नेवथनाकृतिः प्रतिवधदुपमथ
नस्तदंशवितड्डुं जो भ्रमति चित्रमेकोपसो॥ वधूश्च तडिद्दुज्वलाप्रति हरिद्वयं मध्यतः सखी घनक
गोडु जानरति परस्परासोन्सवे॥ अथ वृन्दावनक्रीडा यथा॥ स्थलकमलमलीनां स्तोतिगीते पदं ते
रहतति मतिन्निग्घावन्दनेकुं ट राजी॥ अधरन तभज तीलवने विविधमाल्यानि वसति नव कल्पापश्छेद

श्रीकृष्ण भुजं नमाधिपतेन निर्दृश्य स्पर्शं निषिद्धवती ततश्च कथं चित्तेनस्य रवीयं यमुनाजलकेलिर्यथा॥२६॥
र्शो न तस्पर्श मन्यमानां तां प्रत्याह नकुरुप्रायशपथमिति॥ सर्पपक्षे दूषितामिति तत्स्पर्शविशेषेणेतिभावः॥७८॥ श्रृंग

 कूटे विषाणं वा॥ मेखला कांची अद्रितलांशो वा करतल॥२६॥ प्रतिमा प्रतिविम्बं नाईतं तिनपीडयति॥२७॥

 मा त्वक्षीस्तु धिराधया घनरसैः पर्युक्ष्यमाणा स्वतेमा त्वं भंगम वापवीरतिल्लकोयातः किला हृश्यतां॥ वक्त्रेंद्रोः प्रतिमा छलेन प्रशरणं लज्जः सखी को स्तु भस्तन्मा भ्रश्च कितो विमुक्तचिकुरं नाट्यसौ त्वद्विधं॥ यथा वा पद्यावल्यां॥ जलकेलितरलकरतलमुक्तपुनः पिहितराधिकावदनः॥ जगदवतु कोकयूनो र्विघटनसंघटनकौतुकी कृष्णः॥ अथ नौखेला॥ मुक्तातरंगनिवहेनयतं गपुत्री नव्याच नौरितिवचं स्तवसत्समेव शंका नि दृानमिद मेव ममाति मात्रं त्वंचं चलो यदि हेमाधव नाविकोसि॥ अथ लीलाचौर्यं॥ लीलाचौर्यं भवेदं द्वशी वस्त्र पुष्पादिहारिता॥ तत्र वंशीचौर्यं यथा पद्यावल्यां॥ नीचैर्नीसा दृषच चरणयो र्नूपुरे मूकयन्ती धृत्वा धृत्वा कनकवलयान्युत्क्षिपन्ती भुजाग्रे मुद्रा मश्रोणिश्च कितचकितं पश्यदालोकयन्ती स्मित्वा हरनि मुरली मंकतो माधवस्य॥ वस्त्र चौर्यं॥ यथा॥ छद्मावलिह्रते वनः सपदि का चिद्देकाव्रजं प्रविशपजरती रिहानयत्तघोरकर्मोद्धताः श्रेयं गुणनिधिस्त्वरोरुपरितामिर भ्यर्च्यतां मुमा व्रतकुमारि कापटलचेलपारञ्जरः॥ पुष्पचौर्यं यथा अपि ज्ञानं ज्ञानं हरासि हरिणाक्षि प्रतिदिनं त्वमेव प्रच्छन्नं मम मस्तु मनसां मंजरिमितः॥ त्विरादिष्या चौरित्वमसि विधृता याश्च यमतो गुहा कारा मारान्प्र विशा वसतिं प्रौढिभिरलं॥ अथ घट्टः यथा दानकेलिकौमुद्यां॥ घट्टाधिराज यवमत्य विवादमेव मूयं यदाच रथ दानमदित्त मानाः॥

वंत्तल्ली शोकः पद्मिन्यामञ्जरणास्पर्शेवनाशोकः पुष्पतीतिकविसमः ॥१८॥ क्वचिद्देशे वामं च दशारवो पाशकपातभेदो ॥१९॥
मन्येविधत्स्वननदत्त्वगिरेस्तदेषु दुर्गेषु हन्तविषमेषु रणाभियोगं ॥ अथ कुञ्जादिलीनतायथा विदग्ध
माधवे ॥१७॥ शंकेसंकुलितान्तरा घनिविडक्रीडानुवंधे छयाकुंजे वं ज्युत्सुशाखिनः शशिमुखीन्ली
नावरीवर्त्तिसा नोचेदेषतदंघ्रिसंगमविनाभावादकाले कथं पुष्पामोदनिमंत्रितालपटलीसोत्र
सपात्रीभवेत ॥ अथ मधुपानं ॥ यथा ॥ मुखविधुमुदितं मधुद्विबोसो मधुचषके मधुरं समीक्ष्यमु
ग्धा ॥ अदिशतदृशमेवतत्रपातुं न तं वदनं मुडुरर्थिनापितेन ॥ अथ वधूवेशप्रतिपत्तिर्यथो द्धवसंदेशे ॥
केयं श्यामा स्फुरति सरले गोपकन्या किमर्थं प्राप्ता सख्यं तव मम वा यत्ते निर्मिनाज्ञो वयस्या ॥ आलिंगा
मुमुहुरितिनयाकुर्वतीमां विदित्वानारीवेशं श्रियमुपययोमानिनी यत्र राधा ॥ अथ कपटस्वप्नताय
थाकर्णामृते ॥ स्तोकस्तोकनिरुध्यमानमृदुलप्रस्यंदिमंदस्मितं प्रेमोद्भेदनिरर्गलप्रसृमरप्रव्यक्त
रोमोद्गमं ॥ श्रोतुं श्रोत्रमनोहरं व्रजवधूलीलामिथो जल्पितं ॥ मिथ्यास्वापमुपास्महे भगवतः क्रीडानि
मीलदृशः ॥ अथ द्यूतक्रीडा ॥१८॥ जित्वाद्यूतपणं दशोत्पयहन्वेगंडमुद्रां दक्षिणं सा वामं च दशेतित्त्वरमस
सा दक्षं क्षिपन्नभ्यधात् ॥ आज्ञासुंदरि तेयथेतिहरिणा वामे च दष्टे ततः संरंभादिव साभुजालतिं
कयाकंठे ववन्ध प्रियं ॥ अथ पटाकृष्टिर्यथा ललितमाधवे ॥१९॥ धन्यः सोयं मणिरविरलज्वान्तपुंजे
निकुंजे स्मितामपि कुचपटीं कृष्टवत्युन्मदेन ॥ गाढं गूढाकृतिरर्पितया मन्मुखवाक्यूनवेदी निषीवनयः

कांक्षन्निरकिरन्नारुदैःकृष्णावाक्पमाननामालिनीं तव गताः ॥१४॥

॥उ०ली०॥ रक्तसंजं तु कुंकुमं जोयुडमिति त्रिकांडशेषः ॥२१॥ नागदमनः कान्तियमे ईदृपरं यथा स्यात्तथा स्रगजांकुशवरेण कामं
कुशारव्येन नखेन क्षतमर्पयेत यत तत्क्षमं युक्तं पक्षेनागदमनो महामात्रः परमं यथा स्यात्तथा गजांकुशवरेणेत्यादि

॥१४८॥

किरणलहरीं द्रैपयामास राधां ॥ अथ चुम्बो यथा ॥ कपटचतुरलितनभ्रुवः समन्तान्मुखशशिनं
रभसाद्विधूयमानं ॥ दनुजरिपुरचुम्बदम्बुजाक्ष्याः कमलमिवानिलकंपि चंचरीकः ॥ अथाश्ले
षो यथा ॥२०॥ नवजागुडवर्णयोपगूढः स्फुरदश्रुद्युतिरेतयोन्मदेन हरति स्म हरिर्हिरण्यवल्ली
परिवीतां गगनमालमंगलानि ॥ अथ नखक्षतं यथा ॥२१॥ नकुचाविमोगति जिनास्वयाहृतं गजेतः
प्रसह्य मखिव कुंभयोर्युगं ॥ क्षतमत्र नागदमनो यदर्पयेत्परमं गजांकुशवरेण तत्क्षमं ॥ अथ बिम्बा
धरसुधापानं यथा ॥ नहि सुधाकरबिंबमुधाकरं कुरु मुखं बकरभोरु करावृतं ॥ अधररङ्गणमंगवराङ्गु
नेपिवत्तु नीपवनीभ्रमरस्तव ॥ अथ संप्रयोगो यथा ॥२२॥ द्राग्दोर्मंडलपीडनोद्धुरधियः प्रोद्दामवेजास्त
यानिर्वैधादपरा मनागिनिपिवतः शीत्कारशर्मण्यस्य या ॥ कंदर्पोत्सवपंडितस्य मणितेराक्रान्तकुंजान्तया स्वैर
राधिकया हरेर्मिधुवनक्रीडाविधिर्वर्द्धते ॥ विदग्धानां मिथो लीलाविलासेन यथा सुखं ॥ न तथा संप्र
योगेण स्यादेवं रसिका विदुः ॥ यथा ॥ वल्लेनपरिरंभणेन रदशिखाभिरुह्येखनं हठाद्धरखंडनेभुजगे
नवंधक्रियांदु कूलदलनेहतिं कुवलयेन कुर्वाणया रतादपि सुखं हरे राधिकमादधे राधया ॥ यथा वा ॥२३॥

२३॥ अथ संप्रयोगो यथेत्यारभ्य द्राग्दोर्मंडलेत्यादिकं श्रीमद्ग्रंथकारैरत्र यत्कदिनमपिकेन चिद्दत्यापितमिति निषेयं अनंत

दमेव हि स्वमनं वश्यते विदग्धानामित्यादि ॥२३॥

व्रजनागरीरतिगुरोः श्रीकृष्णस्य नर्मोत्सेककला गांधर्विकायाः श्रीराधाया दृगंचलच्चमत्कारीभ्रुवोर्विभ्रमः पुनस्त
स्य संव्यानस्य विकर्षणे च टुलता चंचलता न स्या इति तया तु कर्णोत्पलेन तस्याहतिः ॥ इतीयं तया सह क्रीडा तथास
ह यः सुरतोत्सवस्तमतिक्रम्यापि भूयिष्ठं यथा स्यात्तथा तस्य नवास्वादं सुखं वितेने ॥ २४ ॥ विचारेण तुलत्वात्
ग्रन्थेनापारत्वात् ॥ २५ ॥ अयमिति ॥ ग्रंथपक्षे ॥ गहनमहाघोषः श्रीमन्नंदराजव्रजः स एव सागरः तत्प्रभव इति

नर्मोत्सेककला दृगंचलचमत्कारी भ्रुवोर्विभ्रमः संव्यानस्य विकर्षणे चटुलता कर्णोत्पलेना
हतिः ॥ क्रीडेयं व्रजनागरीरतिगुरोर्गांधर्विकायास्तथा ॥ भूयिष्ठं सुरतोत्सवादपि नवादपि
नवास्वादं वितेने सुखं ॥ अत एव श्रीगीतगोविंदे ॥ प्रत्यूहः पुलकांकुरेण निविडाश्लेषे निमेषे
ण च क्रीडाकूतविलोकिते धरसुधापाने कथानर्मभिः ॥ आनंदाधिगमेन मन्मथकलायु
द्धेपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः ॥ गोकुलानंद गोविंद गोष्ठेंद्रकु
लचंद्रमः ॥ प्राणेश सुंदरोत्तंस नागराणां शिखामणे ॥ वृंदावनविधो गोष्ठयुवराजमनोहर ॥
इत्याद्या व्रजदेवीनां प्रेयसि प्रणयोक्तयः ॥ २६ ॥ अतुलत्वादपारत्वादासेदुर्विगाहितां ॥ स्पष्टः परं तदस्ये
नरसाब्धिर्मधुरो मया ॥ २७ ॥ अयमुज्ज्वलमणिर्गहनमहाघोषसागरप्रभवः ॥ भजतु तव मकरकुंडल
परिसरसेवां चितीदेव ॥

नंदैकदेशः श्रीव्रजदेवीगणादुद्भूत इति रत्यर्थः ॥ पक्षे ॥ गहनमहाघोषसागरः श्री
मानरसामृतसिंधुनामा प्राक्तनो ग्रंथः तस्मादुद्भूतः ॥ गहनत्वं दुरवगाहत्वं ॥ तत्र मकरकुंडलेत्यादिना तु श्रवण

149

॥उ०नी०॥ वधानप्रार्थनामणिपक्षस्तुस्तुगमः ॥ तदेवमस्य ग्रंथस्य तद्देकाराधनार्थं तां तत्रापि रहस्यतां व्यज्य ताद्दृशतदीयरहस्य
॥१४५॥ रसावसरसंनिधानाधिकाधिभिस्तद्द्रहस्येव यद्गोचनीयतासु पदिदृशेति लघुं ॥ ततश्च ॥ परमोपदेष्टृणं तेषां
मनुमतिर्न केनचिदप्युल्लंघनीया ॥ यतः ॥ कृष्णस्य निर्जनविहारविकाशको यं स्यात्लोकनापरहस्यप्रकटव्यगुतः
श्रीमद्भिः रुज्वलमणिस्तद्दपीहदैवाथ्यतः स एव इति नस्तु समक्षमेव ॥ ॥ इति श्री संभोगभेदविवृतिः ॥ ॥

इति संभोगभेदः ॥ ॥ संपूर्णो यमुज्वल्लनीलमणिनामग्रंथः ॥ ॥ ३७ ॥ ॥ ३५

सनातनसमोधस्य ज्यायान्श्रीमान्सनातनः ॥ श्रीवल्लभोनुजः सोसौ श्रीरूपो जीवसज्ञनिः ॥ शर्मोयं श्रीमदुज्व
लनीलमणिनाम्नो ग्रन्थस्य लोचनरोचनी नाम्नी टीका ॥ ॥ श्रीगुरुचरणः प्रसीदन्तु ॥ ॥ शुभस्थाने ॥ श्रीवृंदा
वनमध्ये ॥ श्रीसेवाकुंजमैं ॥ पुस्तक लिखी ॥ हस्ताक्षर ब्राह्मण लालजीके ॥ शुभमस्तु ॥ मंगलमस्तु ॥ ॥

॥१४५॥

।उ०नी०। इति श्रीउज्ज्वलनीलमणिनामाग्रंथसंपूर्णम् समाप्तम॥ ॥ श्रीराधाकृष्णाभ्यांनमः॥ यादृशंपुस्तकं दृ
॥१५०॥ ष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥१॥ ॥ इतिश्रीमदुज्ज्वलनीलम

150

इति श्रीमदुज्ज्वलनीलमणिनामग्रंथ
संपूर्णम॥ शुभंभूयात समाप्तम॥

णिनामाग्रंथसंपूर्णम् समाप्तम ॥ ॥ श्रीगोपीजनवल्लभायनमः॥ संवत॥१९॥१२॥ मितिचैत्रवदी॥४॥ ॥१५०॥